दिनाङ्क :- 15.06.2025

प्रातः :- 06:55

## प्रधानमन्त्री - यात्रा

प्रधानमन्त्री नरेन्द्रमोदी अद्यारभ्य साइप्रस्, कनाडा, क्रोएशियादेशानां पञ्चदिवसीययात्रायां वर्तते। प्रधानमन्त्री मोदी अद्य साइप्रसदेशस्य राष्ट्रपते: निकोस् क्रिस्टोडौ-लिडेस् इत्यस्य आमन्त्रणेन साइप्रसदेशस्य आधिकारिकयात्रायामस्ति। दशकद्वये भारतीयप्रधानमन्त्रिणः साइप्रस्-देशस्य प्रथमा यात्रा अस्ति।

स्वस्य यात्रायाः द्वितीय-पादे कनाडादेशस्य प्रधानमन्त्रिणः मार्क कार्नी इत्यस्य आमन्त्रणेन श्री मोदी सप्त शिखरसम्मेलने भागं गृहीतुं कनाडादेशस्य कनानास्किस्-नगरं गमिष्यति, जी- सप्त शिखरसम्मेलने प्रधानमन्त्री षष्ठं वारं भागं स्वीकरिष्यति।

स्वीय यात्राया: अन्तिम-पादे प्रधानमन्त्री मोदी क्रोएशियादेशस्य आधिकारिकयात्राम् करिष्यति। भारतीयप्रधानमन्त्रिण: क्रोएशियादेशस्य प्रथमा यात्रा भविष्यति, यत् द्विपक्षीयसम्बन्धेषु महत्त्वपूर्णा सिद्धा भविष्यति। प्रधानमन्त्रिणः त्रयाणां राष्ट्राणां यात्रा साइप्रस्-नगरात् आरभ्यते।

## अमितशाहः

केन्द्रीय गृहमन्त्री अमितशाहः पुनः अवोचत् यत् राष्ट्रियसुरक्षायाः प्राधान्यम् अस्ति इति, येन स्पष्टं भवति यत् भारतस्य संप्रभुताया: खंडने ये प्रयासं करिष्यन्ति तस्य प्रयासस्य समुचित: प्रतिकारः भविष्यति इति । तेन उक्तम् यत् राष्ट्रहितस्य रक्षणार्थं सर्वकारः सदैव तत्पर: विद्यते। सः ह्यः मध्यप्रदेशस्य पचमढी-नगरस्य सुन्दरपर्वतस्थाने भारतीय-जनता- पार्टीति दलस्य एम्. पि.-एम्. एल्. ए. प्रशिक्षणशिबिरे जनसमूहं सम्बोधयन् आसीत्।

## नायडू

नागरिक-उड्डयन मंत्री राम-मोहन-नायडू: उक्तवान् यत् नागरिक-उड्डयन-महानिदेशालयेन भारतीय विमान संघे विद्यमानानाम् चतुस्त्रिंशत् बोईंगत: विमानोत्पादकानां सप्ताशीत्यधिक-सप्तशतं-विमानानां विस्तृत-निरीक्षणाय आदिष्टम् । तेषु अष्ट तत्कालं निरीक्षितानि।

## इसरो

इसरो संस्थया उत्तरप्रदेशस्य कुशीनगरे राकेट्-प्रक्षेपण-परीक्षणं सफलतया कृतम्। ह्यः राकेट्-प्रक्षेपण-परीक्षणं प्रथमवारं उत्तरप्रदेशस्य भूमौ समभवत्। थ्रस्ट्-टेक्-इण्डिया-लिमिटेड् इत्यस्य सहयोगेन आयोजिते परीक्षणे राकेट् एक दशमलव एक किलोमीटरमितस्य आरोहणं कृत्वा पूर्णतया सफलम् अभवत्। परीक्षणमिदं अक्टोबर्-नोवेम्बर्-मासयो: भवितव्यस्य बृहत्- आयोजनस्य प्रस्तावना आसीत्।

## ऋतु:

वायव्यभारते आगामिषु केषुचित् दिवसेषु तापतरङ्गस्य स्थित्यां परिस्कारस्य अपेक्षास्ति। आकाशवाण्या सह चर्चायां भारतऋतुविभागस्य वैज्ञानिकः नरेशकुमारः अवदत् यत् पञ्जाब-हरियाणा-दिल्ली-एनसीआर- क्षेत्राणां केषुचित् भागेषु वज्रपातेन सह वृष्टेः संभावना विद्यते। अत्यन्तं प्रचण्डवृष्ट्या कारणेन आगामि दिन द्वयोः तटीयकर्नाटक, दक्षिण आन्तरिक कर्नाटक, केरल, कोङ्कण, गोवा राज्यानां कृते विभागेन रेड अलर्ट् संचेताना प्रसारितास्ति।

## जिमनास्टिक्स

भारतस्य प्रणति नायक: गतरात्रौ एशियन आर्टिस्टिक जिमनास्टिक्स प्रतियोगितायां महिलानां वर्गे कांस्यपदकं विजितवती। प्रतिस्पर्धा इयं कोरियाया: जेचिअन इत्यत्र आयोजिता।

## वैश्विक-वायु-दिवसः

स्वच्छं सुस्थिरं च विकासं प्रवर्धयितुं अद्य वैश्विक-वायु-दिवसः वैश्विकरूपेण आचर्यते। भारते तावत्, नूतन-पुनर्नवीकरणस्य-ऊर्जा-मन्त्रालयः अद्य प्रातः नववादने बेङ्गलूरुनगरे पञ्चाशत् जी. डब्ल्यू. पवनशक्तिं प्राप्तुं भारतस्य प्रमुखोपलब्धिं प्रकाशयितुं विशेष-कार्यक्रमस्य आयोजनं करोति। अयं कार्यक्रमः ग्रामीणविकासे, हरित-कार्येषु, जलवायु-स्थितिस्थापकतायां च पवनशक्तेः भूमिकां अपि प्रकाशयिष्यति।

## संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धविभिन्नक्रिया-कलापसंवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।